# Shri Bahurupagarbha Stotram

# શ્રીબહુરૂપગર્ભસ્તોત્રમ્

## Document Information

Text title : Bahurupagarbha Stotram

File name : bahurUpagarbhastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan, Ruma Dewan

Description/comments : See dhyAnam in a separate file.

Latest update : February 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 4, 2022

*sanskritdocuments.org*

# શ્રીબહુરૂપગર્ભસ્તોત્રમ્

ૐ બ્રહ્માદિકારણાતીતં સ્વશક્ત્યાનન્દનિર્ભરમ્ ।
નમામિ પરમેશાનં સ્વચ્છન્દં વીરનાયકમ્ ॥ ૧॥

કૈલાસશિખરાસીનં દેવદેવં જગદ્ગુરુમ્ ।
પપ્રચ્છ પ્રણતા દેવી ભૈરવં વિગતામયમ્ ॥ ૨॥

શ્રીદેવ્યુવાચ -
પ્રાયશ્ચિત્તેષુ સર્વેષુ સમયોલ્લઙ્ઘનેષુ ચ ।
મહાભયેષુ ઘોરેષુ તીવ્રોપદ્રવભૂમિષુ ॥ ૩॥

છિદ્રસ્થાનેષુ સર્વેષુ સદુપાયં વદ પ્રભો ।
યેનાયાસેન રહિતો નિર્દોષશ્ચ ભવેન્નરઃ ॥ ૪॥

શ્રીભૈરવઃ ઉવાચ -
શ‍ૃણુ દેવિ પરં ગુહ્યં રહસ્યં પરમાદ્ભુતમ્ ।
સર્વપાપપ્રશમનં સર્વદુઃખનિવારણમ્ ॥ ૫॥

પ્રાયશ્ચિત્તેષુ સર્વેષુ તીવ્રેષ્વપિ વિમોચનમ્ ।
સર્વચ્છિદ્રાપહરણં સર્વાર્તિવિનિવારકમ્ ॥ ૬॥

સમયોલ્લઙ્ઘને ઘોરે જપાદેવ વિમોચનમ્ ।
ભોગમોક્ષપ્રદં દેવિ સર્વસિદ્ધિફલાવહમ્ ॥ ૭॥ (સર્વસિદ્ધિફલપ્રદમ્)

શતજાપ્યેન શુદ્ધ્યન્તિ મહાપાતકિનોઽપિ યે ।
તદર્ધં પાતકં હન્તિ તત્પાદેનોપપાતકમ્ ॥ ૮॥

કાયિકં વાચિકં ચૈવ માનસં સ્પર્શદોષજમ્ ।
પ્રમાદાદિચ્છયા વાપિ સકૃજ્જાપ્યેન શુદ્ધ્યતિ ॥ ૯॥

યાગારમ્ભે ચ યાગાન્તે પઠિતવ્યં પ્રયત્નતઃ ।
શ્રોતવ્યં ચ સદા ભક્ત્યા પરં સ્વસ્ત્યયનં મહત્ ॥ ૧૦॥

નિત્યે નૈમિત્તિકે કામ્યે પરસ્યાપ્યાત્મનોઽપિ વા ।
નિશ્છિદ્રકરણં પ્રોક્તમભાવપરિપૂરકમ્ ॥ ૧૧॥ (પ્રોક્તં સ્વભાવપરિપૂરણમ્)

દ્રવ્યહીને મન્ત્રહીને જ્ઞાનયોગવિવર્જિતે । (યજ્ઞયોગવિવર્જિતે)
ભક્તિશ્રદ્ધાવિરહિતે શુદ્ધિશૂન્યે વિશેષતઃ ॥ ૧૨॥

મનોવિક્ષેપદોષે ચ વિલોમે પશુવીક્ષિતે । (વિલોપે)
વિધિહીને પ્રમાદે ચ જપ્તવ્યં સર્વકર્મસુ ॥ ૧૩॥

નાતઃ પરતરો મન્ત્રો નાતઃ પરતરા સ્તવઃ । (સ્તુતિઃ)
નાતઃ પરતરા કાચિત્સમ્યક્પ્રત્યઙ્ગિરા પ્રિયે! ॥ ૧૪॥

ઇયં સમયવિદ્યાનાં રાજરાજેશ્વરીશ્વરિ ।
પરમાપ્યાયનં દેવિ ભૈરવસ્ય પ્રકીર્તિતમ્ ॥ ૧૫॥

પ્રીણનં સર્વદેવાનાં સર્વસૌભાગ્યવર્ધનમ્ ।
સ્તવરાજમિમં પુણ્યં શ઼ૃણુષ્વાવહિતા દેવિ! ॥ ૧૬॥ (પ્રિયે)

અથ વિનિયોગઃ -
અસ્ય શ્રીમદઘોરભટ્ટારક-સકલ-સ્વચ્છન્દ-ભૈરવમન્ત્રસ્ય
શ્રીકાલાગ્નિરુદ્રભૈરવ ઋષિઃ, પઙ્ક્તિશ્છન્દઃ,
સકલભટ્ટારકાઘોરમૂર્તિર્દેવતા, ૐ બીજં, હ્રીં શક્તિઃ, કુરુ કુરુ કીલકં,
શ્રીબહુરૂપગર્ભપ્રીત્યર્થં પાઠે વિનિયોગઃ ।

(શ્રી ગુરવે નમઃ ।
શ્રીમત્સ્વચ્છન્દભટ્ટારકાય પ્રહ્વીભાવોઽસ્તુ ।
મદ્વંશ પરમ્પરાગતસ્વેષ્ટદેવાય સ્વચ્છન્દનાથાય નમો નમઃ ।

અસ્ય શ્રીબહુરૂપભટ્ટારકસ્તોત્રસ્ય શ્રીવામદેવ ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીબહુરૂપભટ્ટારકો દેવતા,
આત્મનો વાઙ્મનઃ કાયોપાર્જિતપાપનિવારણાર્થં
ચતુર્વર્ગસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ॥

(અઘોરમન્ત્રેણ ન્યાસં કૃત્વા)।
અઘોરેભ્યો અઙ્ગુષ્ઠાભ્યાં નમઃ ।
અથ ઘોરેભ્યો તર્જનીભ્યાં નમઃ ।
ઘોરઘોરતરીભ્યશ્ચ/તરેભ્યશ્ચ મધ્યમાભ્યાં નમઃ ।
સર્વતઃ અનામિકાભ્યાં નમઃ ।

શર્વ! સર્વેભ્યો કનિષ્ઠિકાભ્યાં નમઃ ।
નમસ્તે રુદ્રરૂપેભ્યઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અઘોરેભ્યો હૃદયાય નમઃ ।
અથ ઘોરેભ્યો શિરસે સ્વાહા ।
ઘોરઘોરતરીભ્યશ્ચ/તરેભ્યશ્ચ શિખાયૈ વષટ્ ।
સર્વતઃ કવચાયહુમ્ ।
શર્વ! સર્વેભ્યો નેત્રાભ્યાં વૌષટ્ ।
નમસ્તે રુદ્રરૂપેભ્યઃ અસ્ત્રાય ફટ્ ।
અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરીભ્યશ્ચ (તરેભ્યશ્ચ) ।
સર્વતઃ શર્વ! સર્વેભ્યો નમસ્તે રુદ્રરૂપેભ્યઃ ॥)

અથ ધ્યાનમ્ -
વામે ખેટકપાશશાર્ઙ્ગવિલસદ્દણ્ડં ચ વીણાષ્ટિકે
બિભ્રાણં ધ્વજમુદ્ગરૌ સ્વનિભદે વ્યઙ્કું કુઠારં કરે ।
દક્ષેઽપ્યઙ્કુશકન્દલેષુ-ડમરૂન્ વજ્રં ત્રિશૂલાભયાન્
રુદ્રસ્થં શરવક્ત્રમિન્દુધવલં સ્વચ્છન્દનાથં સ્તુમઃ ॥

(અથ ગાયત્રી
ૐ બહુરૂપાય વિદ્મહે કોટરાક્ષાય ધીમહિ । તન્નોઽઘોરઃ પ્રચોદયાત્ ॥ ૩॥

અથ મૂલમ્ -
ૐ હૂં અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યશ્ચ ।
સર્વથા શર્વ સર્વેભ્યો નમસ્તે રુદ્રરૂપેભ્યઃ) ૧૦૮, ૐ શ્રીભૈરવઃ ॥)
(Notice the stotra verses start with letters from this aghora mantra)
શ્રીભૈરવ ઉવાચ-
ૐ નમઃ પરમાકાશશાયિને પરમાત્મને ।
શિવાય પરસંશાન્તનિરાનન્દપદાય તે ॥ ૧॥

અવાચ્યાયાપ્રમેયાય પ્રમાત્રે વિશ્વહેતવે ।
મહાસામાન્યરૂપાય સત્તામાત્રૈકરૂપિણે ॥ ૨॥

ઘોષાદિ-દશધા શબ્દબીજભૂતાય શમ્ભવે ।
નમઃ શાન્તોગ્રઘોરાદિમન્ત્રસન્દર્ભગર્ભિણે ॥ ૩॥

રેવતીસઙ્ગવિસ્રમ્ભસમાશ્લેષવિલાસિને ।
નમઃ સમરસાસ્વાદપરાનન્દોપભોગિને ॥ ૪॥

ભોગપાણે નમસ્તુભ્યં યોગીશપૂજિતાત્મને । (યોગીશૈઃ પૂજિતાત્મને)
દ્વયનિર્દલનોદ્યોગસમુલ્લાસિતમૂર્તયે ॥ ૫॥

થરત્પ્રસરવિક્ષોભવિસૃષ્ટાખિલજન્તવે ।
નમો માયાસ્વરૂપાય સ્થાણવે પરમેષ્ઠિને ॥ ૬॥

ઘોરસંસારસમ્ભોગદાયિને સ્થિતિકારિણે ।
કાલાદિક્ષિતિપર્યન્તં પાલિને વિભવે નમઃ ॥ ૭॥

રેહણાય મહામોહધ્વાન્તવિધ્વંસહેતવે ।
હૃદયામ્બુજસઙ્કોચભેદિને શિવભાનવે ॥ ૮॥ (હૃદયામ્ભોજ)

ભોગમોક્ષફલપ્રાપ્તિહેતુયોગવિધાયિને ।
નમઃ પરમનિર્વાણદાયિને ચન્દ્રમૌલયે ॥ ૯॥

ઘોષ્યાય સર્વમન્ત્રાણાં સર્વવાઙ્મયમૂર્તયે ।
નમઃ શર્વાય સર્વાય સર્વપાપાપહારિણે ॥ ૧૦॥ (સર્વપાશાપહારિણે)

રવણાય રવાન્તાય નમસ્તેઽરાવરાવિણે ।
નિત્યાય સુપ્રબુદ્ધાય સર્વાન્તરતમાય તે ॥ ૧૧॥

ઘોષાય પરનાદાન્તશ્ચરાય ખચરાય તે ।
નમો વાક્પતયે તુભ્યં ભવાય ભવભેદિને ॥ ૧૨॥

રમણાય રતીશાઙ્ગદાહિને ચિત્રકર્મિણે ।
નમઃ શૈલસુતાભર્ત્રે વિશ્વકર્ત્રે મહાત્મને ॥ ૧૩॥

નમઃ પારપ્રતિષ્ઠાય સર્વાન્તપદગાય તે ।
નમઃ સમસ્તતત્ત્વાધ્વવ્યાપિને ચિત્સ્વરૂપિણે ॥ ૧૪॥

રેવદ્રરાય રુદ્રાય નમસ્તેઽરૂપરૂપિણે ।
પરાપરપરિસ્પન્દમન્દિરાય નમો નમઃ ॥ ૧૫॥

ભરિતાખિલવિશ્વાય યોગગમ્યાય તે નમઃ । (યોગગમ્યાય યોગિને)
નમઃ સર્વેશ્વરેશાય મહાહંસાય શમ્ભવે ॥ ૧૬॥

ચર્ચ્યાય ચર્ચનીયાય ચર્ચકાય ચરાય તે ।
રવીન્દુસન્ધિસંસ્થાય મહાચક્રેશ તે નમઃ ॥ ૧૭॥

સર્વાનુસ્યૂતરૂપાય સર્વાચ્છાદકશક્તયે ।

સર્વભક્ષાય સર્વાય નમસ્તે સર્વવેદિને ॥ ૧૮॥

રમ્યાય વલ્લભાક્રાન્તદેહાર્ધાય વિનોદિને ।
નમઃ પ્રપન્નદુષ્પ્રાપ્યસૌભાગ્યફલદાયિને ॥ ૧૯॥

તન્મહેશાય તત્ત્વાર્થવેદિને ભવભેદિને । (ભવવેદિને)
મહાભૈરવનાથાય ભક્તિગમ્યાય તે નમઃ ॥ ૨૦॥

શક્તિગર્ભપ્રબોધાય શરણ્યાયાશરીરિણે ।
શાન્તિપુષ્ટ્યાદિસાધ્યાર્થસાધકાય નમોઽસ્તુ તે ॥ ૨૧॥

સ્વત્કુણ્ડલિનીગર્ભપ્રબોધપ્રાપ્તશક્તયે ।
ઉત્સ્ફોટનાપટુપ્રૌઢપરમાક્ષરમૂર્તયે ॥ ૨૨॥

સમસ્તવ્યસ્તસઙ્ગ્રસ્તરશ્મિજાલોદરાત્મને ।
નમસ્તુભ્યં મહામીનરૂપિણે વિશ્વગર્ભિણે ॥ ૨૩॥

રેવારણિસમુદ્ભૂતવહ્નિજ્વાલાવભાસિને ।
ઘનીભૂતવિકલ્પાત્મવિશ્વબન્ધવિલાપિને ॥ ૨૪॥ (વિશ્વબન્ધવિભેદિને)

ભોગિનીસ્યન્દનારૂઢિપ્રૌઢિમાલબ્ધગર્વિણે ।
નમસ્તે સર્વભક્ષ્યાય પરમામૃતલાભિને ॥ ૨૫॥

નક્રકોટિસમાવેશભરિતાખિલસૃષ્ટયે ।
નમઃ શક્તિશરીરાય કોટિદ્વિતયસઙ્ગિને ॥ ૨૬॥

મહામોહમલાક્રાન્તજીવવર્ગપ્રબોધિને ।
મહેશ્વરાય જગતાં નમઃ કારણબન્ધવે ॥ ૨૭॥

સ્તેનોન્મૂલનદક્ષૈકસ્મૃતયે વિશ્વમૂર્તયે ।
નમસ્તેઽસ્તુ મહાદેવનામ્ને પરસ્વધાત્મને ॥ ૨૮॥

રુગ્દ્રાવિણે મહાવીર્યરુરુવંશવિનાશિને ।
રુદ્રાય દ્રાવિતાશેષબન્ધનાય નમોનમઃ ॥ ૨૯॥

દ્રવત્પરરસાસ્વાદચર્વણોદ્યતશક્તયે । (ચર્વણોદ્યુક્તશક્તયે)
નમસ્ત્રિદશપૂજ્યાય સર્વકારણહેતવે ॥ ૩૦॥

રૂપાતીત નમસ્તુભ્યં નમસ્તે બહુરૂપિણે ।
ત્ર્યમ્બકાય ત્રિધામાન્તશ્ચારિણે ચ ત્રિચક્ષુષે ॥ ૩૧॥ (ચિત્રચક્ષુષે )

પેશલોપાયલભ્યાય ભક્તિભાજાં મહાત્મને । (ભ્રાન્તિભાજાં)
દુર્લભાય મલાક્રાન્તચેતસાં તુ નમોનમઃ ॥ ૩૨॥

ભવપ્રદાય દુષ્ટાનાં ભવાય ભવભેદિને ।
ભવ્યાનાં ત્વન્મયાનાં તુ સર્વદાય નમોનમઃ ॥ ૩૩॥ (તન્મયાનાં)
અણૂનાં મુક્તયે ઘોરઘોરસંસારદાયિને ।
ઘોરાતિઘોરમૂઢાનાં તિરસ્કર્ત્રે નમોનમઃ ॥ ૩૪॥

(ઉપસંહારઃ -
સર્વકારણકલાપકલ્પિતોલ્લાસસઙ્કુલસમાધિવિષ્ટમ્ ।
હાર્દકોકનદસંસ્થિતામપિ તં પ્રણૌમિ શિવવલ્લભાજામ્ ॥

સર્વજન્તુહૃદયાબ્જમણ્ડલોદ્ભૂતભાવમધુપાનલન્પટામ્ ।
વર્ણભેદવિભવાન્તરસ્થિતાં તં પ્રણૌમી શિવવલ્લભાજામ્ ॥)

ફલશ્રુતિઃ -
ઇત્યેવં સ્તોત્રરાજેશં મહાભૈરવભાષિતમ્ ।
યોગિનીનાં પરં સારં ન દદ્યાદ્યસ્ય કસ્યચિત્ ॥

અદીક્ષિતે શઠે ક્રૂરે નિઃસત્યે શુચિવર્જિતે ।
નાસ્તિકે ચ ખલે મૂર્ખે પ્રમત્તે વિપ્લુતૌજસે ॥ (વિપ્લુતેઽલસે)

ગુરુશાસ્ત્રસદાચારદૂષકે કલહપ્રિયે ।
નિન્દકે જમ્ભકે ક્ષુત્રે સમયઘ્ને ચ દામ્ભિકે ॥ (ચુમ્ભકે ક્ષુદ્રેઽસમયજ્ઞે)

દાક્ષિણ્યરહિતે પાપે ધર્મહીને ચ ગર્વિતે ।
ભક્તિયુક્તે પ્રદાતવ્યં ન દેયં પરદીક્ષિતે ॥

પશૂનાં સન્નિધૌ દેવિ નોચ્ચાર્યં સર્વથા ક્વચિત્ ।
અસ્યૈવ સ્મૃતમાત્રસ્ય વિઘ્ના નશ્યન્તિ સર્વશઃ ॥

ગુહ્યકા યાતુધાનાશ્ચ વેતાલા રાક્ષસાદયઃ ।
ડાકિન્યશ્ચ પિશાચાશ્ચ ક્રૂરસત્વાશ્ચ પૂતનાઃ ॥

નશ્યન્તિ સર્વે પઠિતસ્તોત્રસ્યાસ્ય પ્રભાવતઃ ।
ખેચરી ભૂચરી ચૈવ ડાકિની શાકિની તથા ॥

યે ચાન્યે બહુધા ભૂતા દુષ્ટસત્ત્વા ભયાનકાઃ ।
વ્યાધિદુર્ભિક્ષદૌર્ભાગ્યમારીમોહવિષાદયઃ ॥

ગજવ્યાઘ્રાદયો ભીતાઃ પલાયન્તે દિશો દશ ।
સર્વે દુષ્ટાઃ પ્રણશ્યન્તિ ચેત્યાજ્ઞા પારમેશ્વરી ॥

ઇતિ શ્રીબહુરૂપગર્ભસ્તોત્રં સમ્પૂર્ણમ્ ।
ઇતિ શુભમ્ ।
શ્રીલલિતસ્વચ્છન્દે અથવા વૃદ્ધસ્વચ્છન્દતન્ત્રપ્રોક્તં

Proofread by Aruna Narayanan, Ruma Dewan

---

*Shri Bahurupagarbha Stotram*
pdf was typeset on February 4, 2022

Please send corrections to *sanskrit@cheerful.com*